# Brahmanuchintanam or Atmachintanam

# બ્રહ્માનુચિન્તનમ્ અથવા આત્મચિન્તનમ્

## Document Information

Text title : Brahmanuchintanam or Atmachintanam

File name : brahmaanucintanam.itx

Category : vedanta, shankarAchArya

Location : doc_z_misc_shankara

Transliterated by : Sorin Suciu aka SeSe at sorins at hotmail.com

Proofread by : Sorin Suciu aka SeSe, F. Arav f.arav at home.nl

Latest update : August 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# બ્રહ્માનુચિન્તનમ્ અથવા આત્મચિન્તનમ્

બ્રહ્મચિન્તનિકા

અહમેવ પરં બ્રહ્મ વાસુદેવાખ્યમવ્યયમ્ ।
ઇતિ સ્યાન્નિશ્ચિતો મુક્તો બદ્ધ એવાન્યથા ભવેત્ ॥ ૧॥

અહમેવ પરં બ્રહ્મ નિશ્ચિતં ચિત્ત ચિન્ત્યતામ્ ।
ચિદ્રૂપત્વાદસઙ્ગત્વાદબાધ્યત્વાત્ પ્રયત્નતઃ ॥ ૨॥

અહમેવ પરં બ્રહ્મ ન ચાહં બ્રહ્મણઃ પૃથક્ ।
ઇત્યેવં સમુપાસીત બ્રાહ્મણો બ્રહ્મણિ સ્થિતઃ ॥ ૩॥

સર્વોપાધિવિનિર્મુક્તં ચૈતન્યં ચ નિરન્તરમ્ ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા કથં વર્ણાશ્રમી ભવેત્ ॥ ૪॥

અહં બ્રહ્માસ્મિ યો વેદ સ સર્વં ભવતિ ત્વિદમ્ ।
નાભૂત્યા ઈશતે દેવાસ્તેષામાત્મા ભવેદ્ધિ સઃ ॥ ૫॥

અન્યો અસાવહમન્યો અસ્મીત્યુપાસ્તે યો અન્યદેવતામ્ ।
ન સ વેદ નરો બ્રહ્મ સ દેવાનાં યથા પશુઃ ॥ ૬॥

અહમાત્મા ન ચાન્યોઽસ્મિ બ્રહ્મૈવાહં ન શોકભાક્ ।
સચ્ચિદાનન્દરૂપોઽહં નિત્યમુક્તસ્વભાવવાન્ ॥ ૭॥

આત્માનં સતતં બ્રહ્મ સંભાવ્ય વિહરન્તિ યે ।
ન તેષાં દુષ્કૃતં કિઞ્ચિદ્દુષ્કૃતોત્થા ન ચાપદઃ ॥ ૮॥

આત્માનં સતતં બ્રહ્મ સંભાવ્ય વિહરેત્સુખમ્ ।
ક્ષણં બ્રહ્માહમસ્મીતિ યઃ કુર્યાદાત્મચિન્તનમ્ ॥ ૯॥

તન્મહાપાતકં હન્તિ તમઃ સૂર્યોદયો યથા ।
અજ્ઞાનાદ્બ્રહ્મણો જ્ઞાતમાત્માકાશં બુદ્બુદોપમમ્ ॥ ૧૦॥

આકાશાદ્વાયુરુત્પન્નો વાયોસ્તેજસ્તતઃ પયઃ ।

અદ્ભ્યશ્ચ પૃથિવી જ્ઞાતા તતો વ્રીહિયવાદિકમ્ ॥ ૧૧॥

પૃથિવ્યપ્સુ પયો વહ્નૌ વહ્નિર્વાયૌ નભસ્યસૌ ।
નભોઽપ્યવ્યાકૃતે તચ્ચ શુદ્ધે શુદ્ધોઽસ્મ્યહં હરિઃ ॥ ૧૨॥

અહં વિષ્ણુરહં વિષ્ણુરહં વિષ્ણુરહં હરિઃ ।
કર્તૃભોક્ત્રાદિકં સર્વં તદવિદ્યોત્થમેવ ચ ॥ ૧૩॥

અચ્યુતોઽહમનન્તોઽહં ગોવિન્દોઽહમહંહરિઃ ।
આનન્દોઽહમશેષોઽહમજોઽહમમૃતોઽસ્મ્યહમ્ ॥ ૧૪॥

નિત્યોઽહં નિર્વિકલ્પોઽહં નિરાકારોઽહમવ્યયઃ ।
સચ્ચિદાનન્દરૂપોઽહં પઞ્ચકોશાતિગોઽસ્મ્યહમ્ ॥ ૧૫॥

અકર્તાઽહમભોક્તાઽહમસઙ્ગઃ પરમેશ્વરઃ ।
સદા મત્સન્નિધાનેન ચેષ્ટતે સર્વમિન્દ્રિયમ્ ॥ ૧૬॥

આદિમધ્યાન્તમુક્તોઽહં ન બદ્ધોઽહં કદાચન ।
સ્વભાવનિર્મલઃ શુદ્ધઃ સ એવાહં ન સંશયઃ ॥ ૧૭॥

બ્રહ્મૈવાહં ન સંસારી મુક્તોઽહમિતિ ભાવયેત્ ।
અશક્નુવન્ભાવયિતું વાક્યમેતત્સદાઽભ્યસેત્ ॥ ૧૮॥

યદભ્યાસેન તદ્ભાવો ભવેદ્ભ્રમરકીટવત્ ।
અત્રાપહાય સન્દેહમભ્યસેત્કૃતનિશ્ચયઃ ॥ ૧૯॥

ધ્યાનયોગેન માસૈકાદ્બ્રહ્મહત્યાં વ્યપોહતિ ।
સંવત્સરં સદાઽભ્યાસાત્સિદ્ધ્યષ્ટકમવાપ્નુયાત્ ॥ ૨૦॥

યાવજ્જીવં સદાઽભ્યાસાજ્જીવન્મુક્તો ભવેદ્યતિઃ ।
નાહં દેહો ન ચ પ્રાણો નેન્દ્રિયાણિ તથૈવ ચ ॥ ૨૧॥

ન મનોઽહં ન બુદ્ધિશ્ચ નૈવ ચિત્તમહઙ્કૃતિઃ ।
નાહં પૃથ્વી ન સલિલં ન ચ વહ્નિસ્તથાઽનિલઃ ॥ ૨૨॥

ન ચાકાશો ન શબ્દશ્ચ ન ચ સ્પર્શસ્તથા રસઃ ।
નાહં ગન્ધો ન રૂપં ચ ન માયાઽહં ન સંસૃતિઃ ॥ ૨૩॥

સદા સાક્ષિસ્વરૂપત્વાચ્છિવ એવાસ્મિ કેવલઃ ।
મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ॥ ૨૪॥

મયિ સર્વં લયં યાતિ તદ્બ્રહ્માસ્મ્યહમદ્વયમ્ ।
સર્વજ્ઞોઽહમનન્તોઽહં સર્વેશઃ સર્વશક્તિમાન્ ॥ ૨૫॥

આનન્દઃ સત્યબોધોઽહમિતિ બ્રહ્માનુચિન્તનમ્ ।
અયં પ્રપઞ્ચો મિથ્યૈવ સત્યં બ્રહ્માહમવ્યયમ્ ॥ ૨૬॥

અત્ર પ્રમાણં વેદાન્તા ગુરવોઽનુભવસ્તથા ।
બ્રહ્મૈવાહં ન સંસારી ન ચાહં બ્રહ્મણઃ પૃથક્ ॥ ૨૭॥

નાહં દેહો ન મે દેહઃ કેવલોઽહં સનાતનઃ ।
એકમેવાદ્વિતીયં વૈ બ્રહ્મણો નેહ કિઞ્ચન ॥ ૨૮॥

હૃદયકમલમધ્યે દીપવદ્વેદસારં
પ્રણવમયમતર્ક્યં યોગિભિર્ધ્યાનગમ્યમ્ ।
હરિગુરુશિવયોગં સર્વભૂતસ્થમેકં
સકૃદપિ મનસા વૈ ચિન્તયેદ્યઃ સ મુક્તઃ ॥ ૨૯॥

॥ ઇતિ શ્રીમદ્ શઙ્કરાચાર્યવિરચિતં બ્રહ્માનુચિન્તનં સમાપ્તમ્ ॥

Also known as brahmachintanikA
Encoded by Sorin Suciu aka SeSe at sorins at hotmail.com.
Proofread by Sorin Suciu aka SeSe and F. Arav f.arav at home.nl

---

*Brahmanuchintanam or Atmachintanam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*